पार्व्वतेयं, क्ली, (पर्व्वते भवम् । पर्व्वत+ढक् ।) सौवीराञ्जनम् । इति शब्दचन्द्रिका ॥

पार्व्वतेयः, पुं, (पर्व्वते भवः । पर्व्वत+ढक् ।) सूर्य्यावर्त्तवृक्षः । इति रत्नमाला ॥ हुलचिया इति भाषा । पर्व्वतजाते, त्रि ॥

पार्शवः, पुं, (पर्शुना आयुधेन जीवतीति । पर्शु+ "पर्श्वादियौधेयादिभ्योऽणञौ ।" ५ । ३ । ११७ । इति अण् ।) पर्शुधारियोद्धा । पर्शुना युध्यते इत्यर्थे शप्रत्ययनिष्पन्नः ॥

पार्श्वं, क्ली, पुं, (स्पृश्यते इति । स्पृश+"स्पृशेः श्वण्शुनौ पृ च ।" उणां ५ । २७ । इति श्वण् पृ-आदेशश्च ।) कक्षाधोभागः । इत्यमरः । २ । ६ । ७९ ॥ पाश इति भाषा ॥ (यथा, सुश्रुते चिकित्सितस्थाने । ३६ अध्याये ।
"तिर्य्यक् प्रणिहिते नेत्रे तथा पार्श्वावपीड़िते ॥"
यथा, शकुन्तलायाम् १ अङ्के ।
"न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथ-
जवात् ॥")

पार्श्वं, क्ली, (स्पृश+श्वण् धातोः पृ-आदेशश्च ।) चक्रोपान्तम् । (पर्शूनां समूहः । अण् ।) पर्शुगणः । पार्श्वास्थिसमूहः । इति मेदिनी ॥ (अनृजुरुपायः । इति सिद्धान्तकौमुदी ॥)

पार्श्वः, पुं, जिनः । (अयमेव जैनागमोक्तत्रयोविंशतीर्थङ्करः । अस्य पिता विश्वसेनः माता च ब्राह्मी । यदुक्तं पार्श्वनाथचरित्रे । १० । ७१ ।
"श्रीलश्रीपार्श्वतीर्थेशो विश्वसेननृपालये ।
ब्राह्मीगर्भे जगन्नाथोऽवतरिष्यति मुक्तये ॥"
तथा च तत्रैव । ११ । ३६ ।
"विश्वसेनपतेर्व्वाम्रा: सद्गर्भेऽवतरिष्यति ।
श्रीपार्श्वनाथ एवाद्यतीर्थकर्त्ता जगद्गुरुः ॥"
हेमचन्द्राचार्य्यादिमते तु अस्य पितृनाम अश्वसेनः मातृनाम वामा ॥ * ॥
अस्य जन्मकालादिर्यथा तत्रैव । ११ । ४५—४६, ८६—८७ ।
"वैशाखकृष्णपक्षस्य द्वितीयायां निशात्यये ।
विशाखर्क्षे सुलग्नादौ सुमुहूर्त्ते सुरेश्वरः ॥
अवतीर्णो दिवश्च्युत्वा भुक्त्वा भोगान् सुनिर्म्मले ।
राज्ञ्या गर्भे निरौपम्ये शुद्धस्फाटिकसन्निभे ॥"
"नवमे मासि संपूर्णे पौषे मासि शुभोदयात् ।
सम्यक्चेनिले योगे शुभे एकादशीतिथौ ॥
शुभलग्नमुहूर्त्तादौ सुषुवेऽतिसुखेन सा ।
सती देवकुमारीभिः सेव्या तीर्थङ्करं सुतम् ॥"
बाल्यकाले एवास्य वैराग्योत्पत्तिर्जाता । ततोऽसौ संसारासक्तिं तुच्छीकृत्य गृहादिकं विहाय वनं प्रस्थितवान् । एतत्प्रचलितमतं यथा, तत्रैव । १४ । ७८—९० ।
"मिथ्यात्वेनाविरत्या च प्रमादेन कषायतः ।
दुष्टयोगेन मूढ़ानां महापापं प्रजायते ॥
पञ्चाग्निसाधनेनैव पृथिव्याद्यङ्गिराशयः ।
म्रियते षड्विधः सर्व्वदिक्षु तत्तापसो भृशम् ।
जीवघातेन घोराघं तस्य पाकेन दुर्गतिः ।
जायते च महद्दुःखं तापसानां जड़ात्मनाम् ॥
ज्ञानहीनो वपुःक्लेशो व्यर्थः पापास्रवान्नृणाम् ।
दयां विना तपो धर्म्मः सर्व्वमस्ति निरर्थकम् ॥
तुषखण्डनयोगेन लभ्यन्ते तण्डुला यथा ।
न तथा ज्ञानकष्टेन मोक्षमार्गादयः क्वचित् ॥
यथाम्बुमथनान्नैवोत्पद्यते जातुचिद्घृतम् ।
तथा हिंसाकरेणैव तपसान्न सुखादि च ॥
अत्रान्धाश्मसाद्यथा स्वर्णं गोशृङ्गाच्च पयो न हि ।
जायते जातु धर्म्मो वा सुखं पञ्चाग्निसाधनात् ॥
दावभीत्या यथान्धो धावन्नपि म्रियते यथा ।
कुर्व्वन्नपि तपो ज्ञानी मज्जत्येव भवार्णवे ॥
हेयाहेयविचारञ्च पुण्यपापं हिताहितम् ।
देवादेवं भवं मोक्षं स्वास्रवं सम्वरं शुभम् ॥
निर्ज्जरा तत्त्वविज्ञानं गुरुं चक्रुर्गुरुं शुभम् ।
कुशास्त्रं वेत्ति नज्ञानी जात्यन्ध इव दन्तिनम् ॥
अतो जैनमतं तथ्यं धर्म्मजीवदयावहम् ।
तपोनाथं गृहाण त्वं त्यक्त्वमञ्च दुराग्रहम् ॥
नैपन्यतपसा मोक्षः सुखं वाचामगोचरम् ।
अज्ञानं तपसा दुःखं भ्रमणञ्च भवाटवौ ॥
भवतूक्तेहेन तथ्यंते हितञ्च धर्म्मसाधनम् ।
वचः प्रोक्तं मयेति त्वां हीच्छता शुभमञ्जसा ॥"
तत्प्रचलितानुप्रेक्षादिमतं तत्रैव १५ अध्याये विशेषतो द्रष्टव्यम् ॥ * ॥
जैनशास्त्रोक्ततत्त्वादीनि यथा, तत्रैव २० अध्याये ।
"शृणु तत्त्वं गणाधीश । सार्द्धं द्वादशभिर्गणैः ।
तत्त्वादीनि प्रवक्ष्येऽहं स्वैकाग्रचित्तेन संप्रति ॥
जीवादिसत्पदार्थानां याथार्थ्यं तत्त्वमिष्यति ।
सम्यग् जैनागमे तत्त्वं विद्धि नान्यत् कुशासने ॥
जीवाजीवास्रवबन्धः सम्वरो निर्ज्जरा शिवः ।
इत्युक्तानि जिनाधीशैः सप्त तत्त्वानि चागमे ॥
संसारिमुक्तभेदेन द्विधा जीवा वदन्त्यहो ।
मुक्ता भेदविनिष्क्रान्ता अनन्तगुणभाजनाः ॥
भव्याभव्यप्रभेदेन द्विधा संसारिणोऽङ्गिनः ।
त्रसस्थावरभेदेन वा मुक्तिभवे गामिनः ॥
एकाद्या विकलाद्याः पञ्चाद्यास्त्रेधेति ते मताः ।
देवनारकतिर्य्यग्नृभेदा इति चतुर्व्विधाः ॥
एकद्वित्रिचतुःपञ्चेन्द्रियगेहाच्चपञ्चधा ।
पृथ्वप्तेजोमरुद्वृक्षत्रसभेदात् षड़ङ्गिनः ॥
संज्ञिनोऽसंज्ञिनोद्याद्यास्त्राद्या हि चतु-
रिन्द्रियाः ।
एकाद्या वादराः सूक्ष्माः सप्तधेत्यङ्गिराशयः ।
पर्य्याप्तेतरभेदेन ताः सप्त जीवयोनयः ।
गुणिता अखिला जीवसमासाः स्युश्चतुर्द्दश ॥
अष्टधा धातवो वादरसूक्ष्मेण चतुर्व्विधा ।
नित्येतरनिकोता हि विकलत्रयदेहिनः ॥
संज्ञिनोऽसंज्ञिनः सुप्रतिष्ठिताः अप्रतिष्ठिताः ।
इति संसारिणो जीवभेदा एकोनविंशतिः ॥
ते पर्य्याप्तेतरालब्धिपर्य्याप्तैर्वर्गिता भुवि ।
सर्व्वे जीवसमासाः सप्तपञ्चाशत्प्रमा मताः ॥
स्थावराश्च द्विचत्वारिंशद्भेदाः सुरनारकाः ।
द्विधापञ्चाद्यतिर्य्यञ्चश्चतुस्त्रिंशत्प्रमाः स्मृताः ॥
नवधा मानवाश्चैव नवधा विकलाङ्गिनः ।
इति जीवसमासाः स्युरष्टानवतिसंख्यकाः ॥
पृथ्वप्तेजःसमीरा अष्टधा वादरसूक्ष्मता ।
नित्येतरनिकोताश्चतुर्द्धा वादरसूक्ष्मतः ॥
निकोतसहितास्तद्रहिताः प्रत्येककायिनः ।
एकत्र मेलिता एते सर्व्वे भेदाश्चतुर्द्दश ॥
एकाद्या गुणितास्ते द्विचत्वारिंशत्प्रमाः स्फुटम् ।
पर्य्याप्तकेतरालब्धिपर्य्याप्तैः स्युर्ज्जिनागमे ॥
द्विप्रकाराः सुराः स्युः पर्य्याप्तापर्य्याप्तभेदतः ।
तथा च नारका ज्ञेयो द्विधा दुःखाब्धिमध्यगः ॥
जलस्थलनभश्चारिणं संज्ञासंज्ञिभेदतः ।
षड़्विधा गर्भजा जीवाः पञ्चेन्द्रियसमाह्वयाः ॥
भोगभूमिभवा जीवा द्विधा स्थलखगामिनः ।
ते सर्व्वे मेलिता अष्टभेदाश्च गुणिताः पुनः ॥
पर्य्याप्तेतरभेदाभ्यां षोड़शैव भवन्त्यपि ।
संज्ञासंज्ञित्वभेदाभ्यां जलस्थलखचारिणः ॥
षड़्वासम्मूर्च्छिनास्ते पर्य्याप्तियुक्तास्तथेतराः ।
भवन्त्यलब्धिपर्य्याप्तकाः प्रत्येकं किलाङ्गिनः ॥
हता एकत्र ते सर्व्वे भेदा अष्टादशप्रमाः ।
गर्भसम्मूर्च्छिताः सर्व्वे स्युश्चतुस्त्रिंशदङ्गिनः ॥
आर्य्यम्लेच्छभवा भोगकुभोगभूमिजा नराः ।
अष्टभेदा मता वै पर्य्याप्तापर्य्याप्तभेदतः ॥
सम्मूर्च्छिनो मनुष्या अलब्धिपर्य्याप्तसंज्ञकाः ।
इति विश्वे भवन्त्यत्र नव भेदा नृयोनिजाः ॥
पर्य्याप्तादित्रिभेदेन गुणिता विकलाङ्गिनः ।
नवधा श्रीजिनैः प्रोक्ता ज्ञाननेत्रैर्व्वरागमे ॥
अष्टानवतिरेते जीवसमासा विचक्षणैः ।
विज्ञेया यत्नतस्तेषां दया कार्य्या मुमुक्षुभिः ॥
भूरोदकाग्निवाताख्या नित्येतरनिकोतकाः ।
सप्तसप्तपृथग्लक्षाश्च वनस्पतयो दश ॥
द्वित्रितुर्य्येन्द्रिया द्वौ द्वौ लक्षौ देवाश्च नारकाः ।
पशवो हि चतुर्लक्षाश्चतुर्द्दशनृजातयः ॥
चतुरशीतिलक्षा इमा जीवजातयोऽखिलाः ।
रक्षणीया प्रयत्नेन ज्ञात्वा दक्षैः स्वमुक्तये ॥
कोटीकोटिकानवनवतिलक्षाश्च कोटयः ।
सत्पञ्चाशत्सहस्रा इत्यखिलाङ्गिकुलान्यपि ॥
जीवितः प्रागनादौ हि जीविष्यति पुनः सदा ।
जीवत्ययं ततस्तज्ज्ञो जीवद्रव्यं किलोच्यते ॥
अक्षजाः पञ्च च प्राणा मनोवाक्कायतस्त्रयः ।
आयुरुच्छ्वासनिश्वासो दशेति संज्ञिनां मताः ॥
असंज्ञिनां नवस्युस्ते विनात्र मनसाखिलाः ।
चतुरेन्द्रियजीवानां ह्यष्टौ कर्णैर्व्विना स्मृताः ॥
त्रीन्द्रियाणां विना चक्षुः सप्त प्राणाः प्रकीर्त्तिताः ।
द्वीन्द्रियाणां हि षट्प्राणाः कथिता नासिकां
विना ॥
मुखवाग्भ्यां विनैकाक्षाणां प्राणाः स्युश्चतुः-
प्रमाः ।
यथायोग्यमपर्य्याप्तानां ज्ञेयास्ते जिनागमे ॥
आहाराङ्गेन्द्रियोच्छ्वासनिश्वासवाक्यचेतसः ।
षड़्वा पर्य्याप्तयश्चेति विज्ञेया संज्ञिदेहिनाम् ॥
विकला संज्ञिनां पञ्चपर्य्याप्तयो मनो विना ।
चतुःपर्य्याप्तयो ज्ञेया एकाक्षाणां वचो विना ॥
निश्चयेन भवेत् केवलज्ञानदृग्मयोऽसुमान् ।